श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री हनुमत्ताण्डवस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री हनुमत्ताण्डवस्तोत्रम् ॥

वन्दे सिन्दूरवर्णाभं लोहिताम्बरभूषितम्।
रक्ताङ्गरागशोभाढ्यं शोणपुच्छं कपीश्वरम्॥ 1 ॥

भजे समीरनन्दनं सुभक्तचित्तरञ्जनं
    दिनेशरूपभक्षकं समस्तभक्तरक्षकम्।
सुकण्ठकार्यसाधकं विपक्षपक्षबाधकं
    समुद्रपारगामिनं नमामि सिद्धकामिनम्॥ 2 ॥

सुशङ्कितं सुकण्ठभुक्तवान् हि यो हितं वच -
    स्त्वमाशु धैर्यमाश्रयात्र वो भयं कदापि न।
इति प्लवङ्गनाथभाषितं निशम्य वानरा -
    धिनाथ आप शं तदा स रामदूत आश्रयः॥ 3 ॥

सुदीर्घबाहुलोचनेन पुच्छगुच्छशोभिना
    भुजद्वयेन सोदरीं निजांसयुग्ममास्थितौ।
कृतौ हि कोसलाधिपौ कपीशराजसन्निधौ
    विदेहजेशलक्ष्मणौ स मे शिवं करोत्वरम्॥ 4 ॥

सुशब्दशास्त्रपारगं विलोक्य रामचन्द्रमाः
    कपीशनाथसेवकं समस्तनीतिमार्गगम्।
प्रशंस्य लक्ष्मणं प्रति प्रलम्बबाहुभूषितः
    कपीन्द्रसख्यमाकरोत् स्वकार्यसाधकः प्रभुः॥ 5 ॥

प्रचण्डवेगधारिणं नगेन्द्रगर्वहारिणं
फणीशमातृगर्वहृद्दृशास्यवासनाशकृत्।
विभीषणेन सख्यकृद्विदेहजातितापहृत्
सुकण्ठकार्यसाधकं नमामि यातुघातकम्॥ 6॥

नमामि पुष्पमौलिनं सुवर्णवर्णधारिणं
गदायुधेन भूषितं किरीटकुण्डलान्वितम्।
सुपुच्छगुच्छतुच्छलङ्कदाहकं सुनायकं
विपक्षपक्षराक्षसेन्द्रसर्ववंशनाशकम्॥ 7॥

रघूत्तमस्य सेवकं नमामि लक्ष्मणप्रियं
दिनेशवंशभूषणस्य मुद्रिकाप्रदर्शकम्।
विदेहजातिशोकतापहारिणं प्रहारिणं
सुसूक्ष्मरूपधारिणं नमामि दीर्घरूपिणम्॥ 8॥

नभस्वदात्मजेन भास्वता त्वया कृता महा -
सहायता यया द्वयोर्हितं ह्यभूत्स्वकृत्यतः।
सुकण्ठ आप तारकां रघूत्तमो विदेहजां
निपात्य वालिनं प्रभुस्ततो दशाननं खलम्॥ 9॥

इमं स्तवं कुजेऽह्नि यः पठेत्सुचेतसा नरः
कपीशनाथसेवको भुनक्ति सर्वसम्पदः।
प्लवङ्गराजसत्कृपाकटाक्षभाजनस्सदा
न शत्रुतो भयं भवेत्कदापि तस्य नुस्त्विह॥ 10॥

॥ श्री हनुमत्ताण्डवस्तोत्रं समाप्तम्॥